बालानां शुभकार्य्ये च शुभान्नप्राशने तथा ।
सर्व्वत्र वर्द्धयामास स्वयमेव चकार ह ॥
ध्यानं पूजाविधानञ्च स्तोत्रं मन्त्रो निशामय ।
यत् श्रुतं धर्म्मवक्त्रेण कौथुमोक्तञ्च सुव्रत ॥
शालग्रामे घटे वाथ वटमूलेऽथवा मुने ।
भित्तौ पुत्तलिकां कृत्वा पूजयेद्वा विचक्षणः ॥
षष्ठांशां प्रकृतेः शुद्धां सुप्रतिष्ठाञ्च सुप्रभाम् ।
सुपुत्त्रदाञ्च शुभदां दयारूपां जगत्प्रसूम् ॥
श्वेतचम्पकवर्णाभां रत्नभूषणभूषिताम् ।
पवित्ररूपां परमां देवसेनामहं भजे ॥
इति ध्यात्वा स्वशिरसि पुष्पं दत्त्वा विचक्षणः
पुनर्ध्यात्वा च मूलेन पूजयेत् सुव्रतां सतीम् ॥
पाद्यार्घ्याचमनीयैश्च गन्धधूपप्रदीपकैः ।
नैवेद्यैर्विविधैश्चापि फलेन शोभनेन च ॥
मूलेनौँ ह्रीँ षष्ठीदेव्यै स्वाहेति विधिपूर्व्वकम्
अष्टाक्षरं महामन्त्रं यथाशक्ति जपेन्नरः ॥
ततः स्तुत्वा च प्रणमेद्भक्तियुक्तः समाहितः ।
स्तोत्रञ्च सामवेदोक्तं वरपुत्त्रफलप्रदम् ॥
अष्टाक्षरं महामन्त्रं लक्षधा यो जपेन्मुने ।
स पुत्त्रं लभते नूनमित्याह कमलोद्भवः ॥*॥
स्तोत्रं शृणु मुनिश्रेष्ठ सर्व्वकामशुभावहम् ।
वाञ्छाप्रदञ्च सर्व्वेषां गूढ़ं वेदेषु नारद ॥
प्रियव्रत उवाच ।
नमो देव्यै महादेव्यै सिद्ध्यै शान्त्यै नमो नमः
शुभायै देवसेनायै षष्ठ्यै देव्यै नमो नमः ॥
वरदायै पुत्त्रदायै धनदायै नमो नमः ।
सुखदायै मोक्षदायै षष्ठीदेव्यै नमो नमः ॥
शक्तिषष्ठांशरूपायै सिद्धायै च नमो नमः ।
मायायै सिद्धयोगिन्यै षष्ठीदेव्यै नमो नमः ॥
सारायै सारदायै च पारायै सर्व्वकारिण्यै ।
बालाधिष्ठातृदेव्यै च षष्ठीदेव्यै नमो नमः ॥
कल्याणदायै कल्याण्यै फलदायै च कर्म्मणाम् ।
प्रत्यक्षायै च भक्तानां षष्ठीदेव्यै नमो नमः ॥
पूज्यायै स्कन्दकान्तायै सर्व्वेषां सर्व्वकर्म्मसु ।
देवरक्षणकारिण्यै षष्ठीदेव्यै नमो नमः ॥
शुद्धसत्त्वस्वरूपायै वन्दितायै नृणां सदा ।
हिंसाक्रोधवर्ज्जितायै षष्ठीदेव्यै नमो नमः ॥
धनं देहि प्रियां देहि पुत्त्रं देहि सुरेश्वरि ।
धर्म्मं देहि यशो देहि षष्ठीदेव्यै नमो नमः ॥
देहि भूमिं प्रजां देहि विद्यां देहि सुपूजिते ।
कल्याणञ्च जयं देहि षष्ठीदेव्यै नमो नमः ॥
इति देवीञ्च संस्तूय लेभे पुत्त्रं प्रियव्रतः ।
यशस्विनञ्च राजेन्द्रं षष्ठीदेवीप्रसादतः ॥
षष्ठीस्तोत्रमिदं ब्रह्मन् यः शृणोति च वत्सरम् ।
अपुत्त्रो लभते पुत्त्रं वरं सुचिरजीविनम् ॥
वर्षमेकञ्च या भक्त्या संस्तुत्येदं शृणोति च ।
सर्व्वपापविनिर्म्मुक्ता महाबन्ध्या प्रसूयते ॥
वीरं पुत्त्रञ्च गुणिनं विद्यावन्तं यशस्विनम् ।
शुचिं चिरायुष्मन्तमेव षष्ठीदेवीप्रसादतः ॥
काकबन्ध्या च या नारी मृतापत्या च या भवेत्
वर्षं श्रुत्वा लभेत् पुत्त्रं षष्ठीदेवीप्रसादतः ॥
रोगयुक्ते च बाले च पिता माता शृणोति चेत्
मासञ्च मुच्यते बालः षष्ठीदेवीप्रसादतः ॥
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ४० अध्यायः ॥*॥
चन्द्रस्य षष्ठकलाक्रियारूपतिथिविशेषः । स तु शुक्लकृष्णपक्षभेदेन द्विविधः । तत्र चन्द्रस्य वृद्ध्यनुकूलषष्ठकलाक्रियारूपः शुक्लपक्षीयः। तस्य ह्रासानुकूलषष्ठकलाक्रियारूपः कृष्णपक्षीयः।*। वैशाखादिषु तस्या विशेषनामानि यथा,—
"प्रसूत्या द्वादशे मासि सम्पूज्यापत्यवृद्धये ।
सुते जाते तथा षष्ठ्यां षष्ठी द्वादशरूपिणी ॥
वैशाखे चान्दनी षष्ठी ज्यैष्ठे चारण्यसंज्ञिता ।
आषाढ़े कार्द्दमी ज्ञेया श्रावणे लुण्ठनी तथा ॥
भाद्रे चपेटी विख्याता दुर्गाख्याश्वयुजे तथा ।
नाड्याख्या कार्त्तिके मासि मार्गे मूलकरूपिणी
पौषे मास्यन्नरूपा च शीतला तपसि स्मृता ।
गोरूपिणी फाल्गुने च चैत्रेऽशोका प्रकीर्त्तिता॥"
इति स्कन्दपुराणम् ॥
तत्कृत्यादि यथा,—
अथ षष्ठी सा सप्तमीयुता ग्राह्या युग्मात् । राजमार्त्तण्डे ।
"ज्यैष्ठे मासि सिते पक्षे षष्ठी चारण्यसंज्ञिता
व्यजनैककरास्तस्यामटन्ति विपिने स्त्रियः ॥
तां विन्ध्यवासिनीं स्कन्दषष्ठीमाराधयन्ति च ।
कन्दमूलफलाहारा लभन्ते सन्ततिं शुभाम् ॥"
कन्दं सूरणादि । मूलं तदितरत् । भविष्ये ।
"येयं मार्गशिरे मासि षष्ठी भरतसत्तम ।
पुण्या पापहरा धन्या शिवा शान्ता गुहप्रिया॥"
देवीपुराणे चैत्रमधिकृत्य ।
"षष्ठ्यां स्कन्दस्य कर्त्तव्या पूजा सर्व्वोपचारिका
इहैव सुखसौभाग्यमन्ते विष्णुपुरं व्रजेत् ॥"
इयमेव स्कन्दषष्ठी पञ्चमीयुतैवोपोष्या ।
"कृष्णाष्टमी स्कन्दषष्ठी शिवरात्रिचतुर्द्दशी ।
एताः पूर्व्वयुताः कार्य्यास्तिथ्यन्ते पारणं भवेत्॥"
इति ब्रह्मवैवर्त्तवचनात् ॥
विष्णुधर्म्मोत्तरे ।
"अष्टमीञ्च तथा षष्ठीं नवमीञ्च चतुर्द्दशीम् ।
शिरोऽभ्यङ्गं न कुर्व्वीत पर्व्वसन्धौ तथैव च ॥"
इति तिथ्यादितत्त्वम् ॥ * ॥
सा च कार्त्तिकेयाभिषेकतिथिः । यथा,—
"स्वयं स्कन्दो महादेवः सर्व्वपापप्रणाशनः ।
तस्य षष्ठीं तिथिं प्रादादभिषेके पितामहः ॥
अस्यां फलाशनो यस्तु यजेन्नियतमानसः ।
अपुत्त्रोऽपि लभेत् पुत्त्रान् अधनोऽपि लभेत् धनम्
य यमिच्छेत मनसा तं तं लभति मानवः ॥
यश्चैतत् पठति स्तोत्रं कार्त्तिकेयस्य मानवः ।
तस्य गेहे कुमाराणां क्षेमारोग्यं भवेद्ध्रुवम्॥"
इति वाराहे स्कन्दोत्पत्तिनामाध्यायः ॥ * ॥
तत्र जातफलम् ।
"विद्वान् वरिष्ठश्चतुरः सुकीर्त्तिः
प्रलम्बबाहुर्व्रणकीर्णगात्रः ।
सत्यप्रतिष्ठो धनपुत्त्रयुक्तः
षष्ठीप्रसूतो मनुजश्चिरायुः ॥"
इति कोष्ठीप्रदीपः ॥ * ॥
तत्र यात्राकरणदोषो यथा,—
"पञ्चम्यामीप्सितार्थः स्यात् षष्ठ्यां व्याधियुतो भवेत् ।
सप्तम्यामर्थलाभः स्यादष्टम्यामङ्गपीड़नम् ।
षष्ठ्यष्टमीद्वादशीषु न गच्छेत्त्रिदिनस्पृशि ॥"
इति ज्योतिस्तत्त्वम् ॥
षस, लु र स्वापे । इति कविकल्पद्रुमः ॥(अदा०-पर०-अक०-सेट् ।) मूर्द्धन्यादिः । लु, सस्ति । र,वैदिकः । स्वापः शयनम् । इति दुर्गादासः ॥
षस्ज,सर्पणे । इति कविकल्पद्रुमः ॥(भ्वा०-पर०-सक०-सेट् ।) दन्त्यसोपधः । क्विपि संयोगादिलोपे सक् । सज्जति । वचोऽपि परुषाक्षरं न च पदेषु संसज्जते । इति शाकुन्तले गणकृतानित्यत्वात् । इति दुर्गादासः ॥
षस्त,इ लु र स्वप्ने । इति कविकल्पद्रुमः ॥(अदा०-पर०-अक०-सेट् ।)मूर्द्धन्यादिः दन्त्यसोपधः ।इ, संस्तते । नमध्यपाठेऽपि नस्योपधत्वाभावादेव लोपाभावे इदनुबन्धो वेदेषूच्चारणभेदार्थः । लु, संस्ति । र, वैदिकः । इति दुर्गादासः ॥
षह, ज ङ शक्तौ । इति कविकल्पद्रुमः ॥(भ्वा०-आत्म०-सक०-सेट् ।) इहापि शक्तिः क्षमा । ज, साढः सढः । ङ, अन्यायं सहते नासौ । इति हलायुधः । इति दुर्गादासः ॥
षह,य कि शक्तौ । इति कविकल्पद्रुमः ॥ (दिवा०-चुरा०-भ्वा०-च-पर०-सक०-सेट् ।) शक्तिरिह दैवादिकस्य शकधातो रूपं तेन क्षमा इत्यर्थः । य, सह्यति दुःखं लोकः सहत इत्यर्थः । कि, साहयति । स एवायं नागः सहति कलभेभ्यः परिभवम् । इति दुर्गादासः ॥
षहसानुः,पुं, क्षमावान् । यज्ञः । मयूरः । इति संक्षिप्तसारोणादिवृत्तिः ॥
षाट्, व्य, सम्बोधनम् । इति केचित् ॥
षाड़वः,पुं, गानम् । रसः । इति मेदिनी ॥ रागस्य जातिविशेषः । स च षट्स्वरमिलितरागरागिण्यौ । यथा,—
"औड़वः पञ्चभिः प्रोक्तः स्वरैः षड्भिस्तु षाड़वः
सम्पूर्णः सप्तभिर्ज्ञेय एवं रागस्त्रिधा मतः ॥"
इति सङ्गीतदर्पणम् ॥
षाड्गुण्यं, क्ली, (षड्गुणा एव । "चातुर्वर्ण्यादीनां स्वार्थे ।" ५ । १ । १२४ । इत्यस्य वार्त्तिकोक्त्या ष्यञ् ।) राज्ञां राज्यरक्षणे उपायाः षट् । यथा । सन्धानासनं सन्धिं कृत्वा अवस्थानम् १ । यात्रासन्धानं युद्धार्थयानम् २ । विग्रहासनं वैरं कृत्वावस्थानम् ३ । यायां संपरिगृह्यासनं शत्रोर्भयप्रदर्शनार्थं यानं प्रदर्श्य स्वस्थाने अवस्थानम् ४ । द्वैधीभावः उभयत्र सन्धीकरणम् ५ । अन्येषां संश्रयः दुर्गादेर्म्महाराजस्य वा आश्रयः ६ । इति महाभारते राजधर्म्मः ॥ (यथा, माघे । २ । ९३ ।
"षाड्गुण्यमुपयुञ्जीत शक्त्यपेक्षं रसायनम् ।
भवन्त्यस्यैवमङ्गानि स्थास्नूनि बलवन्ति च ॥")